[illegible] नं ४६

श्रीगीतगोविन्दस्य प्रारम्भ

(जयदेव)

टीका - भाव[illegible] = भावप्रबोधिनी

[illegible] श्री [illegible]

।।पीजनवल्लभाय नमः।। ।।नत्वा श्रीविठ्ठलं गीतगोविंदस्य करोम्यहं।।भावप्रबोधि-
नीनाम्नीं टीकां भावार्थबोधिनीं।।१।।कृतं तस्य जयदेवस्य ग्रंथे संशयनाशिनीं।।तस्मिंश्च द्वादशः सर्गा ज-
यदेवेन वै कृताः।।२।।चतुर्विंशति गीतानि करणे हेतुरुच्यते।।षड्गुणैर्हि युगले द्विके राधामाधवयोरिह।
३।।केलीनां कथनात्सर्गा द्वादशः परिकीर्तिताः।।चतुर्विंशति गीतानि तत्त्वरूपाणि चैव हि।।४।।ग्रं-
थे तेतानि तत्त्वानि यज्ञांधर्वेकजास्तुवे।।श्लोके स्मिन्कथितान्येवं तानि चात्र निगद्यते।।५।।रागता लो-
ह्रे रे ध्यानं शृंगारादि रसा नव।।रंबंफितादीनामष्टानां नायिकानां च वर्णनं।।६।।धीरोदात्तमादि चत्वारः कथ्य-
ते नायकास्तथा।।धर्मार्थकाममोक्षाणां पदार्थानां निरूपणं।।७।।तत्रैकैव करणे चात्र कारणं प्रोच्यते न्त-
रं।।पूर्वं महर्षिभिः सर्वैः स्मृतिभिर्विनिरूपिताः।।८।।संति ते कथ्यते वै स्याद्यथावद्विनिर्णयं।।तत्र धर्म-
स्त्रिधा प्रोक्तो ऋषिभिस्तत्त्वदर्शिभिः।।९।।आचारो व्यवहारश्च प्रायश्चित्तात्मकस्तथा।।तत्राचारे चत्रो-
।।कालिंगे करेति स्रो मृत्तिकाग्रहणादिकं।।व्यवहारे तु कर्तव्यं कर्त्त-

व्यत्वाद्विचारणा ॥ ११ ॥ प्रायश्चित्ते तु पापानां प्रायश्चित्तादिकं तथा ॥ कथनं न क्वचित्तत्र भगवत्स्मर
णादिकं ॥ १२ ॥ धर्मस्त्वेवंविधः प्रोक्तश्चार्थे चैवार्थसाधनं ॥ येन केनाप्युपायेन कर्त्तव्यं तदनर्थकृत ॥
१३ ॥ कामे तु लक्षणं स्त्रीणां पुरुषाणां च वर्णनं ॥ तत्प्राप्तिसाधनानां च भगलिंगादिलक्षणं ॥ १४ ॥ ना
यिकानायकानां च विचारस्तु विशेषतः ॥ एवं विधस्त्रिवर्गो वै साधितुं नैव शक्यते ॥ १५ ॥ तदा मोक्ष
स्तु केनापि साधितुं शक्यते कथं ॥ ज्ञानादेव हि कैवल्यमित्युक्तः शास्त्रतश्च तत ॥ १६ ॥ स्यात्षोडश
पदार्थानां शास्त्रे च विनिरूपिणं ॥ प्रमाणादीनां तत्रैव घटादीनां विचारणा ॥ १७ ॥ कुलालमृत्तिका ॥
पिंडचक्रचीवरयष्टिका ॥ मुख्यावांतरसंवादीकारणानां विशेषतः ॥ १८ ॥ देवात्तत्रागतस्यापि रा
सभस्यैव च चिंतनं ॥ तत्रापि मायिकं सर्वं मिथ्यारूपमिदं जगत ॥ १९ ॥ श्रुतेश्च कथनान्नैव कथनं
तस्य नान्यथा ॥ श्रुतौ तु सर्वं खल्विदं ब्रह्म ॥ यत इमानि भूतानि जायंते ॥ सर्वं विष्णुमयं जगत ॥ स
र्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्याद्युक्तेर्ब्रह्मात्मकस्य जगतः मायिकं मिथ्यारूपं व

दंति।अतस्तत्करणेवाम्नायःकथंकर्त्तव्यइतिविचार्यजयदेवेनानेकप्रमाणैःश्रुतिस्मृतिपुराणादि
प्रसिद्धैर्वाक्यैर्गोविंदएवस्मर्त्तव्यः।कीर्त्तनीयश्च।तद्यथा।आत्मावारेश्रोतव्यःकीर्त्तितव्योनिदध्यासित
व्यश्च।तमेवविदित्वामृत्युमेतिनान्यःपंथाविद्यतइति॥वेदैश्चसर्वैरहमेववेद्यः।तद्वाग्विसर्गोजनता
घविप्लवः।अविच्युतोर्थः।कविभिर्निरूपितोयदुत्तमश्लोकगुणानुवर्णनं॥१॥तस्माद्भारतसर्वात्माभ
गवान्हरिरीश्वरः॥श्रोतव्यःकीर्त्तितव्यश्चस्मर्त्तव्यश्चेति॥वाणीगुणानुकथनेसदागोविंदकीर्त्तनं॥क
लौतुहरिकीर्त्तनात्।आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनरित्यादिवाक्यैर्गोविंदएवकी
र्त्तनीयइतिनिश्चित्यगीतगोविंदाभिधंप्रबंधमकरोदिति॥तत्रकृष्णकृतालीलागोपीभिःसह
वर्णिता॥गोप्योनानाविधास्तत्रश्रुतयोऋषिकुमारिकाः॥१॥सुरस्त्रियोव्रजस्थाश्चचतुर्धैवंप्र
कीर्त्तिताः॥श्रुतयो[illegible]व्रजेजाताइतिप्राग्भवराहरेः॥२॥कल्पंसारस्वतंप्राप्यव्रजेगोप्योभवि
ष्यथ॥नस्त्रियोव्रजसुंदर्यःउक्ताःश्रुतयःकिल॥३॥इत्युक्तेश्चव्रजेजाताश्रुतयोव्रजयो

षितः॥ रामभंडवराज्ञाताःस्तत्रैवाग्निकुमारिकाः॥४॥ कामिनीभावमापन्ना दंडकारण्यवासिन
:॥ जनिष्यंते तत्सूजार्थं संभवं तु सुरस्त्रियः॥५॥ नंदाद्या ये व्रजे गोपा याश्चमीषां च योषितः॥ सर्वे
वै देवताप्राया इत्युक्ताश्च सुरस्त्रियः॥६॥ एतयश्रुतिरूपाणां मंत्ररूपा नरब्रजे॥ ब्रजस्थाः सहजा
श्चासन्नवधा गुणभेदतः॥७॥ राजसादिविभेदैश्च निर्गुणैका प्रकीर्त्तिता॥ सा तु मुख्या ब्रजस्त्री
णां राधिका सर्वतोधिका॥८॥ ब्रजस्था द्विविधा प्रोक्ता अन्यपूर्वा सभर्तृका॥ परकीयात्वसिद्ध्य
र्थं रसोत्पत्तिस्तथाविधा॥९॥ एवं नाना रसानां हि भोक्ता सर्वेश्वरो हरिः॥ रसो वै सः श्रुतिप्रोक्तो
रसो भोगाय तत्र वै॥१०॥ प्रापस्तोर्हरिः साक्षान्नित्यं वृंदावने स्थितः॥ रसो नानाविधश्चापि शृंगा
रादि प्रकीर्त्तितः॥११॥ एवं सर्वरसानां वै भोगः सर्वासु सर्वदा॥ करोति भगवानित्थं राधायां सवि
शेषतः॥१२॥ रमणं ताभिः सर्वाभिस्तारतम्यवदिच्छया॥ स्वयं रासश्च स्वसुखानुमान कथं नो
चितं॥ तद्भगवता कथं कृतमित्यत्रायमाशयः॥ गोविंदलात्र॥ इति गोगोकुलपतिं गोविंदमि

एवं श्रीगीतगोविंदं प्रबंधैर्वर्णयते तूदंशः श्र गीयते गोविंदो येनस्मिन्वा। गीतं गोविंदे नेतिवा। ननु खलीलायाः॥२

त्युक्तेरीश्वरस्य तथाकरणं न दोषाय। किंच रसो वै स इति श्रुत्युक्तेः रसात्मकरसभोगार्थमावि
र्भूतत्वाद्रसस्य गानापेक्षः संगरसभोगस्य गीतमन्तरा बाह्याभिः संगो न भवति। अतः संगरस
भोगार्थं गानमावश्यकं। गायंतं स्त्रियः कामयंतीति श्रुत्युक्तेः। जगौ कलं वामदृशां मनोहरं। नि
शम्य गीतं तदनंगवर्धनमित्युक्तेस्तदावश्यकं। अत एव स्वत उत्कृष्टस्य लीलायशोगानं कर्तव्यं। भ
गवतः सकाशान्नकोप्युत्कृष्ट इत्यतो भगवान् स्वलीलागानमकरोत्॥ यथा द्वारकायां भग
वल्लीलादर्शनार्थमागतो देवर्षिः क्वचिज्जपंतं क्वचिद्ध्यायंतं भगवंतमपश्यत् तथात्रा
पि स्वलीलागानं तत्तु जीवानां दोषावहं न त्वीश्वरस्य। लीलायशोगानश्रवणे दोषः दोषाव
हं चेत्तदा हरेरप्येतल्लीलास्तोत्रादिपाठगानकरणं नोचितं स्यात्॥ तर्हि स्वरहस्यगानं नोचितं। त
त्त्वरसावेशादुन्मनचेतसा गीतं काचित्समं मुकुंदेन स्वरजातिरमिश्रिता। रासे रसे सहनृत्यप
राहरिणा युवतीति वक्ष्यमाणत्वाज्ञानं न तु सम्भुक्तत्वाजीनं॥ तदा परमभगवद्भक्तस्य जयदेवस्य

प्रभोर्भगवतोतिरहस्यरतिलीलावर्णनंनोचितमित्यत्ररसिकोक्तिंतंव्रजवधूभिरिदंचविशेषोः श्रद्धान्वि
तः शृणुयादथवर्णयेद्वा॥ भक्तिंपरांभगवतिप्रतिलभ्यकाममित्युक्तेः फलरूपत्वाज्जयदेवेनगीतं॥ य
था। जयदेवशब्देनभगवानेव। दिवुक्रीडायां दिव्यतीतिदेवः जययुक्तोदेवः जयदेवः। बह्वीभिः प्रम
दाभिः सहरतिरणेनकदाचित्पराजितस्ताभिस्स्तुतश्च सुरतनाथतेशु[illegible]दासिका तरवीरनस्ते
धरामृतमित्युक्तत्वाज्जयदेवशब्देनगोविंदएव तेनप्रदर्शितप्रकारेणगीतमितिभावः॥ एवंश्रीगीत·
गोविंदकरणेहेलादयः प्रोक्तास्तत्रप्रथमंग्रंथारंभेतस्यनिर्विघ्नपारंसमाप्त्यर्थंस्वेष्टदेवतयोः सर्वा
त्मरूपयोः सर्वदेवतारूपयोः सर्वाणस्पयोः श्रीराधामाधवयोरस्मिन्ग्रंथेरतिकेलिनिरूपणात्त
योराशीर्वादात्मकंमंगलप्रयोगंकृतवानित्यत्राह॥ ॥श्री॥ ॥मेघैर्मेदुरमंबरंवनभुवः श्यामा
स्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय॥ इत्थंनंदनिदेशतश्चलितयोः प्रत्यध्व
कुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः॥ राधामाधवयोर्यमुनाकूलेर

हःकेलयोजयंति।कीदृशयोःइत्थंनंदनिदेशातःप्रत्यध्वकुंजद्रुमंचलितयोःहेराधेअयंनक्तं
भीरुःमेघैर्मेदुरमंबरं।तमालद्रुमैर्वनभुवःश्यामाश्चातस्त्वमेवतदिमंगृहंप्रापयेत्यन्वयः।अ
त्रकेचिन्नंदनिदेशातःनंदाज्ञातश्चलितयोर्वदंति।तदानक्तंभीरुरयमित्युक्तौनिशिराधामाध
वनंदादीनामेकत्रस्थितिःकुतआसीत्।कदाचिदेकत्रस्थितावपिमेघादिभिर्युक्तायांरात्र्यांग
मनेभ्रमान्बिभेति।तदासाबालाकथंप्रापयेदित्यसंगतमिति।केचिदपिनंदनिनाम्नीसखीतस्याः
देशातःपादेशातोवदंतितदाराधेगृहंप्रापयेत्याद्युक्तिःकस्याः।किंचनंदनिदेशातइत्यत्रह्रस्वेका
रःनंदनीत्यत्रदीर्घेकारस्तत्तदप्यसंगतंतस्मादत्राद्यमर्थः॥रसोवैसइत्युक्तेःरसात्मकोभगवा
न्रसभोगार्थमाविर्भूतलीलाशृंगारःसखिमूर्त्तिमानिवमधौमुग्धोहरिःक्रीडतीतिवक्ष्यमाणत्वा
त्सद्विविधात्मकः।संयोगविप्रयोगरूपश्चातःपूर्वंसंयोगोवर्ण्यते।सरसमार्गेमध्यनायकाकृत६
संगोरसावहोभवति।तस्मादत्रमध्यनायकाप्रेरितसंयोगरसभोगकरणप्रकारकारिकाभि

इत्थंप्रथमेनाऽकारेणनंदनिदेशातः नंदयत्या [illegible] नंदतीतिनंदः नंदश्चासौनिदेशश्चनंदनिदेशस्तस्मान्नंदनि देशातः ७

सूच्यते। एकदाभगवान्सायंप्राहट्कालेवनेगतांक्रीडार्थंसखिभिःसार्द्धंश्रुत्वाराधांययौस्वयं
॥२॥ तत्रविलोक्यागतंप्रेष्ठंराधिकाहृष्टमानसा॥ जातापरस्परंस्वकेमनोरंजनत्रशंतदा॥ शात्रच्छि
नेत्रनिमीलिनीनिर्लीयस्पर्शनादिका॥ एवंनानाविधाःक्रीडाश्चक्रिरेमिलितामिथः॥३॥ अहोरं
तुंप्रचक्रातेराधाकृष्णौमनस्तदा॥ एतस्मिन्नंतरेसूर्येदृष्ट्वाचास्तंगतेहरिः॥४॥ सखीःप्रत्याहहे।
सख्योरविरस्तंगतोधुना॥ गमिष्येकथमेकाकीनंतंपाहंविजमिदिहि॥५॥ श्रुत्वैवंवचनानिकृष्णाच
तुरातिसखीप्रिया॥ राधांवाक्यमुवाचेदंतयोर्ज्ञात्वांतराशयं॥ ॥मेघैर्मेदुरमंबरमिति॥ ॥अ
त्रायमर्थः॥ इत्थंनंदनिदेशतःश्रीनंदकारीश्राज्ञातश्चलितयोः कीदृशः हेराधे यंनक्तंभीरु
स्तत्तस्मात्त्वमेवेमंश्रीकृष्णंगृहंप्रापय॥ इत्थमेवंविधोयोनिदेशस्तस्माच्चलितयोराधामाधवयोर्य
मुनाकूलेषुकुंजद्रुमेषुनिरहःकेलयोजयंति॥ राधामाधवयोरित्यत्राल्पाह्विंतमाधवपदपू
र्वनिपातंत्यक्त्वाराधापदस्यपूर्वप्रयोगेहेतुराह॥ यत्तोराधाराधसाधसंसिद्धौ। राध्यतइतिरा

Gita Govinda
Bhakti Prabodhini

धासंसिद्धिरूपत्वाद्भगवताराध्यते। एवंच यत्र समंतत्वया रतिपतेरासादिताःसिद्धयः इत्यपरेवद्रूपमा
णत्वादेवंविधमन्यदर्हितत्वात्साक्षात्पद एवनिपातोपुरुः। यद्वानयोः केलय आनंदरूपा रसात्मि
कास्त्वानंदरसः स्त्रीष्वेवतिष्ठतः। तथाहि। तिष्ठत्येतेष्ववानंदः स्त्रीषुगुल्मलतादिषु शृंगारस्त्वैव
साहित्येमहत्स्वभ्रमरादिष्वपीति। किंच लौकिकस्त्रीषुसंसिद्धलक्षणानुरूपेमवेत्। अतोहिभ
जनानंदः स्त्रीषु सम्यक् विधार्यत इति सुबोधिनीकृत्सानंदरसाधिष्ठानत्वात्तस्याः प्रथमग्रह-
णमिति भावः। अत्र लीलारसानुरूपनामत्वान्माधवनामप्रयोगे हेतुरुच्यते। रसात्मको भग
वान् रसभोगार्थमाविर्भूतः रसभोगस्तु लक्ष्मीवतां भवति। तस्मान्मा लक्ष्मी तस्याः धवः पति
ः। रसभोगार्थं नानावस्तुसंपदाई वस्त्राभरणगृहारामवितानास्थानशय्यास्तरणभक्ष्यभोज्यपा
नपात्रसकांचनस्रक्सुगंधिगीतवाद्यादीनां पदार्थाश्चापेक्ष्यंते। अतो मा लक्ष्मीस्त्वाधिदैविकी मा प्र
तिषेधे ब्रह्मादीनां प्रतिषेधं कृत्वा भगवानेव वृतः। तामप्राप्य मयि स्वयंवरपरां द्वीरोदती

ना

दा ५

५

Geeta Govinda vallabhacharya-agrahara.org Bhava Prabodhini

रोदरेखांकेसुंदरीकाउत्कटमपिबहूढोरुक्मिणीपतिरिति । यस्याःस्वकीलक्षणलक्षितेत्यसुरपया
सश्लोकेस्तथा ॥ यद्वा ॥ राधायाःलक्ष्मीत्वमुच्यते । बृहद्गौतमीयोक्तत्वात् ॥ देवीकृष्णमयीप्रोक्ता
राधिकासर्वदेवता ॥ सर्वलक्ष्मीमयीसर्वकांतीसंमोहिनीपरेति ॥ एतदभिप्रायेणराधायालक्ष्मी
त्वं ॥ एवंविधामातस्याःधवः ॥ एवमन्योन्यातिशयाहेतुकस्नेहाधिक्यंसूचितं । राधायांमाधवोदे
वोमाधवस्यतुराधिका । देवताभ्राजतेन्योन्यं । जनेष्वेवंतथैवचेति दिक्परिशिष्टोक्तेस्तथेतिना
दः ॥ एवंविधयोस्तयोःयमुनाकूले । यमुनियमे भगवच्चरणरूपोनियमोयस्याःसायमुना
तस्याःकूलेआवरस्वरूपप्रदर्शिकूलेआवरणेरहश्चातिगोप्यंजलक्रीला हरणकर्तृणांप्रवाह
रहिते । केलयोवक्ष्यमाणाःजयंति । वर्तमानप्रयोगात्केलीनांनित्यत्वंसूचितं । कथंतयोःइत्थं
पूर्वोक्तप्रकारेणयोनंदनिदेशातः ॥ नक्तंभीरुत्वंराधेत्वमेवगृहंप्रापयेत्येवंविधायआनंदकारी
निदेशाज्ञातंप्रध्वनि ॥ ॐजजुमंप्रतिप्रत्यध ॐजजुमंवलितियो ॥ अत्राव्ययीभावसमासत्तोमग

टीका

गीत० भाव. ६

त्केवलुपयोगिनां कुंजादीनामप्यगम्यमित्याभावः। सूचितः कुंजद्रुमं मुक्त्वा कुंजाकारद्रुमं संकेतवटा
दिरूपं। अध्वोक्त्या कुंजद्रुमं मार्गस्थिति। तत्र कुंजद्रुमं प्रापय। अयं नक्तं भीरुस्त्वं निर्भयासि। रजन्ये
षा घोररूपा तथाविधायां निशि गमनात्। अयं नक्तं भीरुश्चेत्तदा तथाविधायामेकाकी कथं नी
तः तदा योगमायामुपाश्रितः। सा मध्ये नायकाले स्थितत्वात्तस्मात्साधुना त्वं मध्यनायकासि कथं
न प्रापयसि। यद्वा। बह्व्यः सख्यः संति ताः कथं न प्रापयेयुः तत्राह। त्वमेवेति। नान्या एवकारेणान्य
निषेधः कृतः यथा रुक्मिण्या विवाहे शिशुपालादीनागतान् वीक्ष्य कुंडिनवासिनो जनाः प
श्चाद्भगवंतमागतं दृष्ट्वा प्रोचुः। अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरमिति तथात्राप्येवंकारेण।
न्यनिषेधोक्तः त्वमेव प्रापय। यद्वा। न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते। तत्त्वमेव गृहं प्रापयं गृहि
णीं भवेति भावः। ननु यद्भयाद्वाति वातोयं सूर्यस्तपति यद्भयात्। यद्भिनेति स्वदं कथमित्यत्रायमा
शयः। रसो वै सः। रसात्मको भगवान् रसभोगार्थमाविर्भूतत्वात् रसास्तु नानाविधाः शृंगारादय।

प्रबोधिनी.

५३
६

स्पंदंतः पाती नयानकास्तस्यानुभवः कर्तुर्भगवतो नक्तं भीरुरुक्तः इति भावः। अत एव न क्तमुक्तं नक्तं
सर्वदा। रात्रिस्तु रजनिस्त्रियामा जसी तामसी च रसात्मिका। भगवांस्तु सात्विकः। यथा फलप्रकरणे भग।
वानपि तारात्रीः दीर्घ रत्तुमनक्ष्यके। तत्र सात्विको पि रसाविष्टः सत्वरसोद्बोधार्थं रात्रय स्तामस्यो·
र्हीतास्तथात्रापि भयरसोत्पादकत्वान्नक्तं। भीरुत्वोक्तः। नहि भगवतः कृष्णादिनामानि त्यक्ता·
यमिमं कथमुक्तं तत्रायमाशयः। यद्यपि रसात्मकस्य भगवतस्तथापि भयमुक्तं नाम्नो ग्रहणे
ती५ सरस्वती वाग्देवता संकुचंति हेतोर्नाम्नो नयमुक्ता गृहीतमिति भावः। तदा ऋकारांत्यां राधां कुल १५
जां इदं कथं प्रापयामि इष्टं कोपि पश्येत्तत्राह। मेघैरिति॥ ॥अंबरमाकाशं मेघैर्मेदुरं निबिडां·
धकारयुक्तं। अत्र मेघोक्त्या मेह सेचने मेहतीति मेघः। रससेचनोन्मुखं पक्वं ज्ञाता स्वयम
पितज्ञाच पापको जातः। स खलु विदधात् स्ववपुषांबुदश्चात्तपत्रमित्युक्तेः। रसरूपत्वात् सारूप्यं प्रा
प्तत्वात् श्रीकोकिलस्तु कं भ्रमिसारोन्मुखं पक्वं ज्ञाताव ऊर्मिः सत्पे अंबरमेदुरं गाढांधकारयुक्तं·

स्तं॥ किंच मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः इति विरहोत्सुकं भवति। एवंविधैः अभ्रां
बरोत्थाश्काशार्करकलंकं चोक्तं॥ यथांबरच्छादितं वस्तु न कोपि पश्येत्तथापि मेदुरमतिगाढं सूक्ष्मां
बराच्छतं तदंतस्थं वस्तु यदा चिह्नरूपं ते। तदभावाय तथोक्तमिति भावः। एवंविधप्रकाशभावेन को
पि पश्येदिति च। यद्वा। मेघैर्बहिर्व्यंचनेन यावंतो मेघधर्मा इंद्रधनुषविद्युद्बकपंक्तिगर्जनादयस्तेषामभ्रा
भगवत्युच्यंते। सजलजलदवच्छ्यामविग्रहः तुल्यं पीतांबरं अपि यत्तुल्यं च। इंद्रधनुषतुल्यं मयूरपि
च्छावतंसं बकपंक्तिमुक्तामालां गर्जनं वेणुरवः एवं सामग्र्यालाभेन गमनेन कोपि ज्ञास्यंति। यथा
विद्युत्तासह मेघस्तथा लया सह भगवान् एवं दूरस्थानां दर्शनाभावमुक्त्वा निकटस्थानामा
ह॥ श्यामास्तमालद्रुमैरिति॥ वनभुवस्तमालद्रुमैः श्यामाः॥ बहुभिः श्यामैस्तमालद्रुमैः वन
भुवः शर्मितसमोद्भूताः। तत्र गमने समीपस्थापि न द्रक्ष्यंति। यद्वा। यथा तमालद्रुमैर्वनभुवः
श्यामास्तथा भगवता सह त्वं श्यामा भोग्या वार्षिकी। त्रिभुवनकमनं तमालवर्णं तत्तुल्यो भग

वन

वानैर्भुवस्तं त्यालैः श्यामा भोमेदुरा वार्षिकी मधुरभाषिण्य प्रसूता। भुवौ बहुवचनेन यथा रक्तापीताह
रितास्विता श्यामा नानावर्णैः रूपा भूस्तथा त्वमपि नानावर्णवस्त्राभरणधारणा तथा। तमालद्रुमैर्बहुव
चनेन तत्तुल्यरूप भगवतोपि बहुरूपत्वं। कृत्वा तावंतमात्मानं यावतीर्व्रजयोषितः। इत्युक्ता। देवीष्ठं क्षमा
वीप्रोक्ता राधिके त्वं तु कलाद्यया भगवान्बहुरूपस्तथा त्वमपि नानालावण्यरूपा भगवन्मनोरथपूरणा
र्थं तथारूपा न वसीति भावः॥ एवंविधा श्रीकृष्णेन सहगमनेन निकटस्योपि न पश्यति। तमालद्रुमै
र्वनैर्भुवः श्यामा भोत्याद्यर्जं कुंजद्रुमपर्यंतमंधकारमुक्ता भुवः प्रोक्ताः। तेन चंद्रकिरणैरपि तत्र
प्रकाशाभावश्चोक्तः॥ एवमस्मिन् ग्रंथे राधामाधवयोः केलयो जयंतीत्यनेन नमस्कारोप्यादिष्ट
ः। तयोरहः केलयः प्रतिपाद्यत्वाद्वस्तुनिर्देशोपि एवं पदत्रयप्रतिपादनादस्य माहाकाव्यत्वमुक्तं
। सर्गबंधो महाकाव्यमुच्यते। तस्य लक्षणं॥ आशीर्नमस्क्रिया वस्तुनिर्देशश्चापि। यत्रैमो बूहि। एवं
विधं प्रबंधं जयदेवकविः तत्राह॥ ॥वाग्देवेति॥ ॥वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीच

करोति

रण चारणचक्रवर्त्ती॥ श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं॥१॥

जयदेवकविरेतं प्रबंधं करोति। एतच्छब्दस्याकृतान्वादेशद्वितीयैकवचनत्वादसकृणरोपणरद्वितय
पार्थप्रबंधः। द्वितीयएकोप्येतादृशो नास्तीति तं। प्रबंधः प्रकृष्टो बंधो नानासनविशेषो यस्मिन्। यद्वा।
प्रकर्षेण बध्यते श्रोतृणां हृदयं येन तं। कीदृशं यतः श्रीवासुदेवरतिकेलिकथासमेतं श्रीश्च वासु
श्च श्रीवासुदेवौ तयो रतिकेलीनां कथाप्रबंधकल्पनास्वकीयप्रकृष्टासनबंधकथनरूपा तद्यु
क्तं। अत्र श्रीपदेन हृहृज्ञौतमीयोक्ता श्रीराधा वासुदेवपदेन ज्ञेणो वसूनां प्रवरो वसुश्चदिव्यती
नंदः ति वसुदेवः वसुदेवस्यापत्यं वासुदेवः श्रीनंदकिशोरं श्रीकृष्ण एव। यद्वा। श्रीमांश्चासौ वासुदेव
श्च नानारससंयोगे श्रीरुपद्दिता। तद्युक्तो वसुदेवात्मजः। यद्वा। महद्युडुकुलोद्भव वसवात्मजः॥
श्रीवासुदेवशब्देन सर्वसमर्द्धिमान्नायकशिरोमणिः परमकुलोद्भवं परकीयत्वं द्योतितं रसोत्प। ८
त्यर्थं। कीदृशः कविः। वाग्देवताचरितचित्रितचित्तसद्मा। अत्र वाक्शब्देन भगवानेव कीर्त्ति

श्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा॥बृहत्सामयथासाम्नांगायत्रीछंदसामहमित्युक्तेः।
स्तथा॥वागेवदेवतावाग्देवताश्रीकृष्णस्तस्यचरितंलीलातानिश्चित्रितंताभिश्चितंतच्चित्तंतादृ
शंसद्मगृहंयस्यसःयथानानासनबंधैःकोकशास्त्रोक्तैःचित्रितगृहेशयनेरसोत्पत्तिःस्यात्त
थाभगवल्लीलाचित्रितंचित्तसद्मरसात्मकस्यभगवतोत्राक्रीडोभवतीति अतएवगृहादिपदं
त्यक्तासद्मोक्तं।सत्समासद्रूपंभातिमानयतीतिसद्मातेनभगवदधिष्ठानमुक्तंदेवतास्त्रीलिंग
त्वादेवंविधरसलीलाधिष्ठानेनतद्योग्यतोक्ता॥किंवावाग्देवतासरस्वतीत्युच्यते॥तदायतोवाचो
निवर्त्ततेअप्राप्यमनसासहेत्युक्तेः॥किंवासाऽकुमारीरतिकेलिरसानभिज्ञाभगवल्लीलावर्णने
सामर्थ्याभावात्तस्मान्नोक्ता॥ननुयतोवाचोनिवर्त्ततेचेत्तदाजयदेवस्यकुतःसामर्थ्यमितिभावः॥किं
चायथाश्रीभागवतदशमलीलावर्णनेवैयासिकिःसभगवानितिशुकोक्तस्तथात्रवर्णनमक
रोत्नोचेद्दृष्ट्वानुयांतमृषिमात्मजमाप्यनग्नंदेव्योह्रियापरिदधुर्नसुतस्यचित्रंतद्वीक्ष्यपृच्छति

Geeta Govinda
Vallabhacharya
Bhavaprabodhini

गीत० भाव०
९

शुक

मुनौजगडस्तवास्तिस्त्री त्वंनिंदानतुस्तुतस्यविविक्तदृष्टेः॥ परिनिष्ठोपिनैर्गुण्येह्युत्तमश्लोकली।
लयागृहीतचेताराजर्षेवाख्यानंयदधीतवानित्याद्युक्तं।यथादेवश्चकरोत् तथा।जयदेवोपिकरो
तीतिभावः॥ यद्वाजयोस्मिव्यवसायोस्मितत्त्वंतत्त्वविदामहमित्युक्तेर्जयएवदेवोजयदेवःभगवा
न्पूर्वोक्तजययुक्तोदेवःजयदेवःक्रीडार्थमाविर्भूतत्वाद्देवः।निरंतरक्रीडाकरणविचारस्त्री।
ललनास्तासांनिश्चित्रितचित्तंसन्रसरतिकेलिकथाप्रबंधकल्पनाप्रकृष्टासनबंधविशेषःकल्पतेय
त्रसा।एवंविधातयासमेतंप्रबंधंकरोति॥ शुकदेवजयदेवादिभक्तानांगानार्थं।विक्रीडितंव्रज
वधूभिरिदंचविष्णोःश्रद्धान्वितःश्रृणुयादथवर्णयेद्यस्तुरुःफलरूपलाभश्चोक्तं।अतएवायंवक्ष्य
माणमामियंचलितांविलोक्यप्रियेचारुशीलोदाहरणमधुनारायणेत्यष्टपदीत्रयंलिखित्वाजयदेवे
नभगवद्रूपनिरूपणेसंकोचकृतस्तदापुस्तकंस्थाप्यभोजनार्थंगतस्तदाभगवतागत्यस्वहस्तेन
गीतत्रयंलिखित्वास्थापितंतदाजयदेवेनागत्यावलोकितंअहोमयेदंलिखितंनास्तिकेनेदंलि

ना ३
९

[illegible]खितमितिविचारणेनभगवतोक्तंमयाकरणेसंकोचोनकृततस्त्वंलेखनेक
थंसंकोचंकरोषीतिपरंपरयामहाप्रभुमुखात् श्रुतत्वात्तथोक्तं।पुनःकीदृशःपद्मावतीच
रणचारणचक्रवर्ती।पद्मंविद्यतेकरचरणतलेपरमसौभाग्यसूचकंपद्मचिह्नंयस्याःसाप
द्मावतीश्रीराधा।यद्वादिविलक्ष्मीमयीत्युक्तेःयथाबहुनामाभगवांस्तथाराधापिपद्मावतीत
स्याश्चरणचारणेननृत्येचक्रवर्ती।राजवद्दृष्टावा।पद्मावतीनाम्नीकाचिद्द्विजसुंदरीत।
स्याश्चरणचारणेचक्रवर्ती।वर्त्तमानेरासरसेसहनृत्यपराहरिणायुवतीप्रशशंसइति॥य
द्वा।तत्रचक्रंमंडलंतद्वर्त्तयतीतिचक्रवर्ती।पद्मावतीचरणचारणायनृत्यार्थरासमंडलप्रव
र्त्तकः।नृत्यतिगायतिकाचित्सर्वज्ञेयाणमन्त्रुष्टुहस्तुमल्लोरासमंडल॥इत्युक्तेश्च।जयदे
वपद्वेपूर्वोक्ताराधापद्मावतीराधातस्याश्चरणचारणेचरगतोप्राप्तौतदुपासकानांभक्तानांमु
ख्याग्रणी।यद्वा।तस्याःअग्रेनर्त्तकमुख्यः।यद्वा।जयदेवस्यप्रियापद्मावतीतस्याःनृत्यकरणे·

देवेनोक्तायद्वा वाग्देवताचरितचित्रितचित्तसद्मात्वात्तत्रापि निर्णयजयदेवद्वारया भगवतोक्तं यद्वा जय
ति१

राजवद्दृष्टेति।एवंविधोजयदेवकविःश्रीवासुदेवरतिकेलिकथासमेतंप्रबंधंकरोतीभावः।न
नुजयदेवकविःकरोतीत्यत्रजानीतेजयदेवएवेत्यादिवक्ष्यमाणंचतथाकथनमन्यस्येवभाति
।अत्रायमाशयः।जयदेवशब्देनपूर्वोक्तिगोविंदएवगीतगोविंदमित्युक्तत्वात्।भगवद्भक्तिर्जय ४
देवपदेनोक्तोभक्तमुख्यत्वादस्तिमानाभगवान्भक्तानांयत्कृतंतत्सर्वंभगवत्कृतंभवति।तस्मा
दहंकरोमीतिनोक्तं।तर्हिभक्तानामहंताममतानावर्त्ततेवक्ष्यमाणश्रीजयदेवकवेरिदं।कवि।
नृपजयदेवके।भणतिजयदेवकविराजराजेइत्याद्युक्तिः।स्वस्यप्रौढिमास्वयंकथमुक्ता।त
त्रायमर्थः।यथानराधिपःस्वसेवकस्यातिकार्यकरणाद्राजेतिनामकरोतिततोधिककार्यकर
णाद्राजाकरोतिततोधिककरणात्संतुष्टःसन्राजराजानामकरोति।तथाधिकारंददाति।
तथात्रचतुर्दशभुवनैकनाथेश्वरस्यश्रीवासुदेवस्यरतिकेलिकथाप्रबंधकरणात्पूर्वंश्री
जयदेवकविःकृतः।तत्राधिकरतिरसवर्णनात्कविनृपजयदेवकविःप्रोक्तः।ततोप्यधिक

वर्णनाङ्गणत्ति जयदेवकविराजराज इति भगवत्कृताभिधानत्वात् स्वयमपि तथैवोक्तं। यथा-
राज्ञः कृताभिधानं पत्रादिलिखने तथैव नाम लिखति। तत्पत्रस्य प्रथमनाम लिखने प्रत्युक्तो योग्य
वृति। तथात्र मंतव्यमिति भावः॥ एवं श्रीगीतगोविंदप्रबंधकरणाधिकारं प्रोक्त्वा तच्छ्रवणाधि
कारं कथयन्नेवाह। यदि हरिस्मरण इति॥ ॥यदि हरिस्मरणे सरसं मनो यदि विलासकला
सु कुतूहलं॥ मधुरकोमलकांतिपदावलीं शृणु तदा जयदेवसरस्वतीं॥३॥ यदि हरिस्मरणे
मनः सरसं यदि विलासकलासु कुतूहलं॥ तदा मधुरकोमलकांतपदावलीं जयदेवसरस्व
तीं शृणु। अस्यायमर्थः। सकलदुःखहर्त्ता हरिस्तस्य स्मरणे सति सकलदुःखाघनाशे। कुहे
जाते यदि मनः सरसं रसेन रसात्मकेन भगवता सह वर्तमानं। एवं किं त[illegible]चरितावचित्रितवि
त्तस्य रसात्मकभगवदाविर्भावेन तत्सहवर्त्तमानं तदा। अन्यच्च। यदि विलासकलासु कु
तूहलस्य [illegible]लासु पंचदश। कलासु शृंगाराद्यो नवरसास्ते कलारूपाः ऐश्वर्यादयः ष

गीत०भाव०
२२

षड्गुणस्तोरकलारूपाः एवंपंचदशकलात्मको भगवान् पूर्णपुरुषोत्तमः॥ यथा पंचदश
कलात्मकः पूर्णचंद्रः एवंविधस्य भगवतः क्रीडाकलाकुतूहलं तत्र कौतुकाविष्टं यदा म
नस्तदा मधुरश्रवणेष्वारंजिकायां कोमलकांतश्रवणेष्वारम्यां मनोहारि एवंविधानां प
दानां विनतंतानामावली श्रेणीरूपां जयदेवसंबंधिनी सरस्वती स्वरूपो भगवांस्तेन सह
युक्तां एवंविधां सरस्वतीं शृणु इत्यपर्थः॥ यद्वा यदि हरिस्मरणे विलासकलासु कुतूहलं मन
स्तदा मधुरकोमलकांतपदानां चरणानां स्तुत्यादि पदावली नानाप्रकारसंगीतशास्त्रोक्तप
दोक्ततालशब्दानां श्रेणी रासमंडलस्वरूपां तत्र जयस्वरूपो देवो जयरूपो भगवान् स्तस्योत्कर्षेण स
हनृत्यपरा हरिणाडुवती प्रशासंसा एवंविधरूपां तत उक्तसरस्वती वाणी विद्यमानरूपां
शृणु इति तात्पर्यं॥ एतेन वक्तृश्रोत्रोः समानाधिकारत्वमुक्तं॥ ननु एवमुक्तं यतो वाचो निवर्तंते
तस्मात्सरस्वतीपदं त्यक्त्वा वाग्देवतोक्ताधुना सरस्वतीं शृणु इति युक्तमिति चेत्तत्राह॥ जयदेव

रास ४
२२

Geeta Govinda
Bhava Prabodhini

तेनोक्ता१

सरस्वतीमिति तत्त्वरितचित्रितचित्तसद्मारूपस्य जयदेवस्य किं वा भगवतात्मकस्य तत्संबंधि
नीनत्वं नोक्तमिति भावः ॥ ननु तेभ्यः सकाशाज्जयदेवस्य सरस्वती प्रति को वा विशेषस्तेभ्यः सका
म२ शात्कथं न श्रेष्ठत्वमिति चेत्तत्रान्यानपि वैशिष्ट्यमाह ॥ वाचः पल्लवयतीति ॥ ॥ वाचः पल्लवयत्युमाप
तिधरः सन्दर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ॥ शृंगारोत्तरसत्प्रमेय
रचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोई कविः क्ष्मापतिः ॥४॥ उमापतिधरनामा
माकविः वाचः पल्लवयति । पल्लवितां करोति । वाक्कडंबर्य नानाप्रमेयानुप्रासाद्दारमैत्रीरू
पपल्लववत्तदुक्तौ । ननु पुष्पफलयुक्तौ । पुष्पशब्देन भक्तेः साधनं दानव्रततपोहोमजपस्वाध्या
यसंयमादिरूपं ज्ञानं साधनं । फलशब्देन श्रवणकीर्त्तनादयः । स्वरूपलीलादिवर्णनादि भक्ति
रूपं फलं च ताभ्यां रहितौ । न तच्च चित्रपदमित्यादिवाक्यात्तदपि न श्रोतव्यं । [illegible] । पल्लवे इष्ट
दृशौ नाच्छायान्नवेन्न तु पुष्पसौगंध्यफलप्राप्तिजनितं तृप्तिश्च । शरणनामा कविः दुरूहद्रु

तेश्लाघ्याः। दुरूहस्य पदबंधस्य काव्यस्य द्रुते शीघ्ररचनायां श्लाघ्यः स्तुतियोग्यः। शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः। शृंगार एवोत्तरो मुख्यो यस्मिन् ये सत्प्रमेयाः सामान्यनायकादिवर्णनेरूपास्तेषां रचनैः आचार्यगोवर्द्धनस्य स्पर्द्धांकरणे कोपि विशेषेण न श्रुतः अनेन तद्वचः स्तुक्तत्वादपि न श्रोतव्यं। धोई नामा कविक्ष्मापतिः कविराजः स श्रुतिधरः श्रवणमात्रेण ग्रंथादीनां धारणं करोति। न तु स्वयं करोति ततः किं श्रूयते। तस्मात्संदर्भशुद्धिं गिरां गीयते भगवद्गुणा यया सा गीस्तां जयदेव एव जययुक्तं देवं सर्वोत्कृष्टं श्रीकृष्णं द्योतयति प्रकाशयतीति जयदेवः। अतः स एव जानीते एवकारेणान्यनिषेधश्चोक्तः। आत्मनेपदेनात्मगामित्वं ज्ञानस्य चोक्तं। एवंविधो जयदेव एवंविधां सरस्वतीं अविच्छिन्नधाराप्रवाहरूपां क्वचित्सुकटां क्वचिद्दुश्रानि पायां श्रवणांतःकरणयोः सरसजनकां संसारतापनाशकां रसेन सह वर्त्तमानां सरस्वतीं जयदेवसंबंधिनीं वा ततः श्रोतव्येति

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

नारः। अथात्र प्रथमं राधामाधवयोर्यमुनाकूले रहःकेलयो जयंति इत्युक्तं। अथ च। श्रीवा
सुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधमिति प्रतिज्ञाकरणाद्रतिकेलि
नां सर्वोत्कृष्टप्रतिपादनायादौ सर्वरसभोक्तुरखिलनायकशिरोमणिरत्नश्रीकृष्णस्य रसात्मक।
स्य शृंगारादिनवरससंभोगकरणार्थं तत्र रसाधिष्ठातृदेवताधिष्ठितरसाः सांगी न चेत्तदा रसावहाः स्या
त्। यथा देवताधिष्ठितमंत्रा यथोक्तफलसिद्धिदा नेतुस्तथा शृंगारादयोपि स्युः। अतो भक्तिर
सामृतसिद्धांतोक्तमत्स्यादिभगवद्दशावतारेषु शृंगारादिनवरसेषु देवतात्वमुच्यते। तथा हि। म
त्स्यकूर्मौ वराहश्च नृसिंहो वामनस्तथा॥ भार्गवो राघवो रामो बुधः कल्की तथैव च॥१॥ दशावता
राश्च हरेर्विख्याता दश देवताः॥ शृंगारादीनां देवतानां रसानां च पृथक् पृथक्॥२॥ शृंगारहास्य
बिभत्सा अद्भुतो रौद्र एव च॥ वीरो भयानकश्चैव करुणः शांत एव च॥३॥ रसा अमी हि विख्यातास्ते
मत्स्यादिदेवताः॥ अवतारा हरेस्ते तु विज्ञेयाः क्रमशस्तथा॥४॥ नृसिंहवामनौ देवौ ह्यद्भुतं धिष्ठि

तौमतौ॥एवं रसानां ख्यातानां देवतादृशा॥५॥प्रोच्यंते प्रथमे गीति श्रृंगारादिरसास्त्रयः॥अवतारै
स्त्रिभिस्तैस्तु श्रृंगारादिरसा नव॥वर्ण्यंते क्रमशश्चात्र पदैश्च दशभिः पृथक्॥६॥प्रोच्यंते तु तथै
केन पदेन च कवेः कृतिः॥एवमेकादशपदे रतिकेल्युपयोगिनां॥७॥श्रृंगारादिरसानां हि क्रि।
यते वर्णनं दशैः॥अथातो रसो वै सः इत्युक्ते रसास्तु भगवद्रूपास्ते तु मत्स्याद्यवतारैः श्रृंगारादिर
सा नव॥वर्ण्यंते क्रमशश्चात्र पदैर्निरूप्यंते॥अत्र प्रथमं श्रृंगारस्तु रक्तजा श्रृंगाररसो निरूप्यंते
अत्र शोधपत्रमस्ति। स द्विविधः संयोगविप्रयोगात्मकश्च। तत्र प्रथमं संयोगः स च मध्यनाय।
काकृतः। यथा सजलजलमिश्रितदिव्यंबीजमंकुरं॥ श्रृंगवक्षोपुलतं चैव तथा नावांकुरोद्भ
दि॥१॥ सरसे श्रृंगवृक्षोपि समंताद्याप्ति इति। तद्बीजांकुरन्यायेन रसत्वाच्च विशेषतः॥२॥
तस्माच्छृंगारविख्यातो रसः सहृदलात्मकः॥ यद्वा। यथा रक्तं शरीरस्थं हेतुर्निर्विकृतिं ग
तं॥ श्रृंगं कषीति तत्त्वेन सुखं समधिगच्छति॥३॥ तथानुरक्तं विकृतं मनः संदर्शनादिभिः दृ

त्नुतिः शृंगारवत्सम्यक्कृस्वतं कर्षेति संस्थितं ॥४॥ रसोभावांकुरस्तस्माच्छृंगारः सरसः स्मृतः ॥ त
स्माच्छृंगारविख्यातो रसः सद्विदलात्मकः ॥५॥ हरेर्मीनावतारस्तु तस्याधिष्ठातृदेवता ॥ प्रोच्यं
ते विबुधाधर्मसाम्यात्स्वाङ्करसंप्रति ॥६॥ तंचापि विडिशं शृंगं मीनं रक्कं प्रकर्षति ॥ तस्मान्मीना
वतारे वै रसः शृंगारवर्ण्यते ॥७॥ एवं नवरसाश्चैव तेष्वधिष्ठातृदेवताः ॥ दशावतारा सीनाद्या
: कथ्यंते तत्रवै हरेः ॥८॥ दशावतारे चैतन्मध्ये नृसिंहवामनाभिधौ ॥ रसस्यैवाङ्कुतस्यैव कथितौ
च देवते ॥९॥ यथा मंत्रादयो देवाधिष्ठिताः स्युः सुसिद्धिदाः ॥ तथा रसावहाश्चैव देवताधिष्ठि
ता रसाः ॥१०॥ अतो मीनावतारस्य शृंगारस्य रसस्य वै ॥ देवताकृतिसाम्यत्वात्प्रोच्यते तत्र सार
सः ॥११॥ शृंगे मीनेन चापि तिष्ठतः संगते सदा ॥ सुखं जलस्य संयोगाद्विरहेन तस्य दुःखितः ॥
एवं धर्मससाद्दत्र पाच्छृंगारस्य रसस्य तु ॥ मीनावतारे तस्यैव वर्णनं प्रोच्यतेन्दृशां ॥१३॥ सद्विवि
धः संयोगविप्रयोगः रूपश्च तत्र प्रथमं शृंगारमुख्यत्वात्तत्संयोगात्मकः मध्यनायकाकृतः ।

सिद्धः सांगरसावदोनवेदत्तः प्रथमं नक्तंभीरुरयं राधे त्वमेव तदिमं गृहं प्रापयेत्युक्तिव्याजेन
मध्याकृतः संयोगश्चोक्तलादित्थं नंदनिदेशतश्चलितयोर्यमुनाकूले रहः केलयः मीनाद्या
सनबंधविशेषकृतास्ताः कुंजबहिः स्थिताः सख्यः जालरंध्रेषु दृष्टवत्यः तासंस्तदा केल्पनं
तरं भगवंतं कथयामासुः ॥ ॥प्रलयपयोधिजल इत्यादि ॥ गौडीमालवरागे ॥ रूपकताले ॥
प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदं ॥ केशव धृतमीनशरीर ज
य जगदीश हरे ॥१॥ हे केशव धृतमीनशरीर त्वं जय त्वं प्रलयपयोधिजले यथा मीनशरीरं
धृत्वा विहितवहित्रचरित्रं अखेदं धृतवानसि । किमधुना त्वं तथा कृतवानसि । हे जगदीश हे
हरे हरिपदसंबंधः अस्यायमर्थः ॥ हे केशव । कश्च अश्च ईशश्च ते केशाः । ब्रह्मा विष्णु शिव
ः तेषां चमृतबीजरूपं सुखं प्रयच्छतीति केशवः । त्वं मीनशरीरं धृत्वा विहितवहित्रचरित्रं
यथा स्यात्तथा वहतीति वहित्रं तच्चरित्रं च वहित्रचरित्रं कृत्वा नौकारूपं चरित्रं कृत्वा वेदं धृ

Geeta Govinda
Bhav Pradeepika

तवानसि।नन्वनेनस्वरूपेणकथंवेदोनोद्धृतः।मीनशरीरधरणेकोहेतुरितिचेत्तत्राह।अत्र
खेदमिति।अखेदंयथास्यात्तथाखेदाभावपूर्वकंयद्यपिभगवतःसर्वंकर्तुंसमर्थस्यखेदोना
स्तितथापितत्सात्मिकेनानेनस्वरूपेणप्रलयकालीनपयोधिजलप्रवेशेनभक्तानांतद्दर्शनात्तः
खेदोभवत्येवातस्तंनिराकरणायाखेदमित्युक्तं॰किंचाब्ध्यादिनिर्गमनेसक्तोप्रार्थितश्च।म
त्स्याश्वकस्यपनृसिंहवराहहंसराजन्यविप्रविबुधेषुकृतावतारः।त्वंपासिनस्त्रिभुवनंतथा
धुनेशाइत्युक्तत्वात्।चात्रअथमीनस्यागाधजलप्रवेशोखेदाभावः।प्रत्युतस्यातिसुखोत्पत्तिः।
जलंविनास्थातुमशक्तश्चातोमीनशरीरंधृत्वाब्रह्मादीनांसुखदानात्केशवइतिभावः।ज
गदीशवेदंधृतवाञ्जगदुद्धारकत्वाज्जगतामीशत्वाज्जगदीशेतिसंबोधनं।ब्रह्मादीनांदुःख
हरणाद्धरेतिसंबोधनंइतिहेतोःसंबोधनत्रयं।अनेनभक्तानांस्वस्यापिखेदाभावःसूचित
:।नन्वेताव्रजसीमंतिन्योभक्ताःस्नेहात्मिकाः।माहात्म्यज्ञानादिरहिताःकथंतासांपूर्वोक्त

रकृतच्चरित्रज्ञानं स्यादित्यत्रायमाशयः॥ ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्यषड्गुणात्मकस्य भगवतः सान्निध्यात्संयोगे विरहे तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः। तद्गुणानेव गायंत्य इत्युक्तत्वात्तदावेशश्चैव तद्गुणानां तद्धर्माणां तासु तद्वस्तुस्वभावात् ज्ञानं भवत्येव। यथा स्पर्शमणौ भगवद्दत्तसामर्थ्यात्तस्य स्पर्शादेवाचैतन्यलोहादिधातूनां कांचनं करोति तदा भगवत्सांनिध्यात्तदात्मकादिधर्मयुक्ततदावेशादिरूपाणां च तद्गुणतद्धर्मस्फूर्त्तिः कथं न स्यात्। अत एव कस्याश्चित्पूतनायंत्याः कृष्णायंत्याः कृष्णोहं पश्यत गतिमित्यादिकरणात्तथात्रापीति भावः॥२८॥ एतास्तु सर्वा नित्यश्रुतिरूपा ऋषिरूपाश्च तासां भगवद्धर्मगुणानां ज्ञानं नात्रेऽद्भुतमिति भावश्च। इति हेतोः सर्वावतारकृतमीमच्चरित्रमुक्तवत्यः। तथाधुनात्रापि हे केशवेति संबोधनेन राजससात्त्विकभावापन्नानां सुरदः प्रलयपयोधिजले अत्र प्रलयशब्देन मोक्षः विशंति सर्वतः सिंधौ तद्वत्तां गतयोंतत इति वाक्यात्। परंपरया

न भवति प्रवेशो लयो मोक्षः लीयंते लयनं वा लयः ॥ लिंगप्रवेशो लाशापणे वा । तत्र सुखदुःखात्यंताभावात्मकः ॥ अत्र तु प्रकृष्टो लयः ॥ भक्तिमार्गीयशृंगाररसात्मकानंदरूपस्य प्रवाहे नैव तादृशः कोपि मोक्षः नीवीमोक्षणरूपः तथाहि ॥ अविदितसुखदुःखं निर्गुणं वस्तु किंचिन्म नास्ति यदगमं मोक्षमित्याचक्षते मम तु मतमनंगस्मेरतारुण्यघूर्णं मदकलमदिराक्ष्या नीवीमोक्षो हि मोक्षः ॥ १ ॥ अन्यच्च ॥ धन्यासि या कथयसि प्रियसंगमेपि विस्रब्धचाटुवचनानि निरंतराणि ॥ नीवीं प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि ॥ १ ॥ इति स्मृतिराहित्यान्मोक्षसाम्यं । सुरते च समाधौ च मनो चात्र न लीयते । किं तेन च ॥ सुरते नैव किं तेन । सुरते नैव किं तेन च समाधिना ॥ २ ॥ तस्मादस्मार्गीयैरेवंविधो मोक्षप्रलयशब्देनोच्यते । पयोधिपदेन यथा पयोधिरगाधः । ससत्वतरंगपूर्णस्तथायमपि । जले रसात्मके रसरूप एवंविधे प्रलयः पयोधिजले विहित । वहित्रचरित्रं यथा स्यात्तथा । वह प्रापणे । वहति प्रापयति । तद्वहित्रं वि

हितं वहित्रं प्रापणरूपं चरित्रं रविश्रांत्तं गतः स खेदो गमिष्यामि कष्टदं नक्रं नीरुरित्यादि वाक्ये।
विहितं वहित्रचरित्रविधाय प्रलयपयोधिजले हे धृतमीनशरीर मीनाकारासनबंधविशेषे।
ए धृतं मीनशरीरं येन सः। तद्क्रमासनबंधे प्रसार्य हस्तौ पादौ च उभा रथ यत्रांगना यते। नाय
कामुपरिस्थाप्य स वै मीनासनस्मृतः॥ १॥ हृत तथाविधलमधुना वेदं वा इदं वेदं। यद्वा। वेदं वात्स्या
यनशास्त्रे प्रतिपाद्यं बंधादि निपुणत्वं। पूर्वमेवं विधानंदरूपः। किं वा इदं मीनशरीरं धृतवान्।
असि। रूपांतरेण खेदो जातो भविष्यतीति चेत्तत्राह। अखेदं। खेदरहितं प्रत्युत सुखदमिति भा
वः। यद्वा। निर्वीमोरूणाणवसरेनानीक्ष्णदर्शनेन मीनधर्मत्वं प्राप्तः। यथा मीनश्चातिचपलज
लं विना स्थातुमशक्तः तथा त्वमपि एतन्नानीक्ष्णदंदृक्षा एतद्रसं विना त्वमपि तथेति भावश्च। तस्मा
देकं विधदुक्षेवचत्वमधुना प्रलयपयोधिजले धृतमीनशरीरं वेदं धृतवानसीत्यर्थः। अत्र हे
जगदीश जगतः स्वस्य हरीशः स्वामी। नित्रैव काचित् रसास्त हितिविधा तु र्वितिरेकिणी। तुक्केः

Geeta Govinda
Bhava Prabodhini

तेनतदतिरिक्तास्सर्वसृष्टिःस्वभोगार्थंस्वयंनिर्मितवानित्यर्थः।हरिपदेनैतावत्कालपर्यंतापा
प्तिजदुःखहरणहृत्केशवपदेनस्वीकृतराजसादिभावापन्नानांगोपसीमंतिनीनांमन्मत्ता
धिकमोक्षाधिकसुखदानात्स्या।ननुगुणातीतोभगवान्निर्गुणमामुपागता इत्युक्तेश्चस्वभो
गार्थंस्वनिर्मितालोकिकथंगोप्यःराजसादिगुणभावापन्नाउच्यंतेतत्रायमाशयः।यथागुणा
तीतोभगवान्षड्गुणात्मकःप्रोच्यते।प्राकृतलौकिकगुणरहितोऽलौकिकगुणानंदमात्र।
करपादमुखोदरादिःश्रीकृष्णस्वभोगार्थंयत्किंचिदलौकिकंगुणयुक्तंप्राकृतगुणरहितं
भगवान्सृष्टिमकरोत्।इच्छामात्रेणमनसाप्रवाहंसृष्टवान्हरिः।वचसावेदमार्गंहि
पुष्टिंकायेननिर्ममे॥२॥इतिश्रीवैश्वानरोक्तलीलाऽसभोगार्थंस्वसृष्टिंकृतवान्।तास्तुनाना
प्रकाररूपानेकरूपश्चातोनानागुणभावात्मकागोप्योनिर्मिताःगुणाश्चेततदात्मकाएव
यथा।वैकुंठेपक्षिणोहंसान्टसादयश्चध्यात्मकादृरजस्तमात्मकास्तथात्रापिवैकुंठे।

आधिदेवकपरब्रह्मश्रीपुरुषोत्तमात्मकंलीलोपयोगिकयत्किंचिन्निर्गुणमेवमंतव्यं।अतएव
जहुर्गुणमयंदेहमिति।।श्रीशुकोक्तिश्चेतिभावः।एवंविधश्रीराधायांसंयोगशृंगाररसानुभ
वं।स्वयंकृत्वालीलांकारयित्वातस्याविप्रयोगशृंगाररसकारणार्थंरात्रावागमिष्यामीत्युक्त्वाभग
वानन्यत्ररमणार्थंगतस्तत्रनागतस्तदाश्रीराधायाःभगवदनागमनाद्विरहेतत्प्रतीक्षयातंप्र
लयकालवद्दुःखेप्राप्तेत्रुटिर्युगायते।तामपश्यतामितिशुकोक्तेश्च।अन्यायाविरहरसदानार्थंततः
सकाशात्तत्स्वरूपेश्रीराधायागृहेसमागतेभगवति।तत्रापितस्मिन्नशरीरेमीनाकारेनखक्षतं
किंतेदृष्टेसतिखंडितात्वंप्राप्तातद्यथाहि।।निद्राकषायकलुषीकृतताम्रनेत्रोनारीनखक्षत
विशेषविचित्रितांगः।यस्याकृतोऽरिरहमेतिपतिःप्रभातेसाखंडितेतिकविभिःकथितापुरा
णैरिति।।एवंविधासाभगवंतमवदत्।प्रलयपयोधिजलइत्यादिना।।केशवधृतमीनशरी
रधृतानिमीनशरीराणिनखक्षतरूपाणियेनतथाविधः।एवंतथाविधप्रलयपयोधिजले

त्वांविनाप्रलयवत्प्राप्तः खेरोदनेनपयोधिजलवदश्रुधाराइत्युक्तेकालेप्राप्तेत्वमागत्यवेदंधृत
वानसिभगवद्वचनात्मकोवेदः सत्यंकुरुष्वनिगममित्युक्तेऽ।अद्यमागमिष्यामीत्युक्त्वागतस्तत्सत्यं
कर्तुंत्वरयातर्हिआगतरात्रिंविनातत्तरत्र्यामन्यत्रास्थितोपस्यागमनेवेदात्मकंवचनमुद्धृतवान
सिकेनप्रकारेणकथंविहितं।वहिश्चचौर्यंयथास्यात्तथा।विहितंवहितंचरित्रंवहनस्वरूपंचरित्रं
विहितंखिद्यत्सुजातांघ्रितलामुन्निन्येप्रेयसींप्रियामित्यादिस्वरूपंचरित्रंविहितं।कीदृशं।य
द्वा।अस्वेदं।खेदनिवर्त्तकं॥खिद्यत्सुजातांघ्रितलायाः खेददूरीकरणार्थमुन्निन्ये इतिभावः।य
तोजगदीशंगच्छतीतिजगत्यामवतिसदयागच्छतितस्याः ईशत्वौयातायानंदसूनुना।इत्युक्ते
ःहरेतांदरणात्तामन्नीविहायगोविंदंश्रीतोयामनयद्धरिरित्युक्तेश्चाएतत्सर्वंरासक्रीडायी
स्वानुभूतत्वात्तथाधुनाप्येवंकयासदृक्तंनविष्पतीतिज्ञात्वालोकवतीतिभावः।अत्रशुचिरुज्व
लवेदीवरणाच्छृंगारः शुचिरुज्वलइत्युक्तेश्चश्रृंगाररसाधिष्ठातृदेवतामीनावतारोक्तत्वान्मी

रु॰

Geeta Govinda
Bhava Prabodhini

नावतारेशृंगाररसः।संयोग/विप्रयोगात्मको/द्विविधोवर्णितः।एकदाभगवान्स्वयंसंकेतस्थले
कुंजांतेस्थिताश्रीराधानयनार्थंमध्यनायकांसखींप्रेषयित्वास्वयंतदागमनप्रतीक्षयास्थि
तस्तदातयोरागमनंज्ञात्वातदाहूमेवदंगसंगोप्यरहसिनिलीयस्थितस्तत्रागतासतिप्रिया
प्रियतमंनायरूपत्तदावक्ष्यमाणनिभृतनिकुंजगृहंगतयानिरीक्ष्यरहसिनिलीयवन्तंसाचकि
तविलोकितसकलदिशारतिरसवशेनहसंतमितिवक्ष्यमाणेत्वंकंविनोकेश्चतथाविधंविलो
क्यतीवकोमलायांप्रियपृष्ठौश्रनिकटितायांकुंकुमादिसुगंधातिशयलिप्तात्पामुपरिपति।
त्वापीडयित्वाबाहुभ्यांसमुपनीय[illegible]निभृतनिकुंजगृहंगतयेतिवक्ष्यमाणप्रकारेणक्रीडितश्च
।ततःप्रातरेवंविध[illegible]ताबहिरागत्यपरखंडितायांमानवत्यांगृहंगत्वात्ह्लीस्थिताकोमलां
कविन्स्तनामामकिनांदृष्ट्वापृष्ठीसाप्रोक्तवतीत्यत्राह।। ।।क्षितिरतिविपुल[illegible]नि।। ।।क्षितिर
तिविपुलतरेतवतिष्ठतिपृष्ठेधरणिधरणकिणचक्रगरिष्ठे।केशवधृतकच्छपरूपजयजग

दीशहरे॥२॥ हे केशव धृतकच्छपरूप जय। यतो विपुलतरे तव पृष्ठे क्षितिस्तिष्ठति। यथा कच्छ
प पृष्ठे क्षितिस्तिष्ठतीति तथा तवापि। पंचाशत्कोटियोजनविस्तीर्णा क्षितिस्तस्याः समावेशस्तत्पृ
ष्ठे कथमेवं तत्राह॥ कीदृशे पृष्ठे विपुलतरे। तस्या अपेक्षया अतिशयेन विपुलतरे॥ अत्रापि वि
पुलतरे कृपा। षोडशसहस्रव्रजवनितानामेवं करणे समावेशः सूचितः तिष्ठतीति वर्त्तमानप्रयो
गेणैवंविधकरणस्यापि नित्यत्वं सूचितं। कुंकुमादियुक्तवक्षोजसंबंधात्पृष्ठेः क्षितित्वं ज्ञापि
तं। यतो गंधवती पृथिवीत्युक्तेः। पुनः कीदृशे धरणीधरणकिणचक्रगरिष्ठे। धरणीधरमंदरा।
चलपरिवर्तितं घर्षणात्किणिनेन तथात्र धरणीधरस्तुल्पाति कठिनोन्नतोरोजपीडनेनातिकोम
लपृष्ठे तत्कलाचिह्नरूपकिणचक्रेण घर्षणावर्त्तनेन गरिष्ठे निश्चले तस्याः पृष्ठाद्विंगनेन्मसाति
काविर्भावात्स्तंभादियुक्तत्वात्तथोक्तिरिति भावः। एवंविधपृष्ठयुक्तत्वात्कच्छपोक्तिपरिहासो
क्तेर्हास्यरसस्य निरूपणं। तस्य रूर्भावितारोधिष्ठातृदेवतात्वात्तन्निहास्यरसः। एवमुच्यमा

नंवाक्यंश्रुत्वाचभगवतःहास्यजातंतदाप्रसारितमुखदर्शनेमृत्तिकांलग्नांदृष्ट्वा।यद्वा।तथा
विधेहास्येप्रसारितेमुखाब्जेजातिसौगंध्यनिस्सृततच्छटाघ्रायसापुनः प्रोवाचतत्राह॥ ॥वस
तिदशनसिखरलग्ना॥ ॥वसतिदशनशिखरेधरणितवलग्ना।शशिनिकलंककलेवनिमग्ना।
केशवधृतशूकररूपजयजगदीशहरे॥३॥हेकेशवधृतशूकररूपजयकिमधुनाशूक
ररूपमपिधृतंत्वयायथाशूकरस्यदशनाग्रशिखरेधरणीलग्नावसतितथातवदशन।
शिखरेऽपिबाल्येमृद्भक्षणेकृतंयत्तद्दिनमारभ्याद्यापिलग्नावसतीतिज्ञापितं।कुतः।शृंगी
कृतंसुकृतीनःपरिपालयंतीतिश्रुतेश्च।यद्वालीलायानिसल्लाघ्वतथा।कस्मिन्केव।शि
शिनिकलंककलेवयथा।शशिनिचंद्रमसिकलंककलातथातवदशनशिखरेधरणी।यथा
चंद्रेकलंककलानित्यातथात्वयीयमितिज्ञापितं।तस्मिंस्तुकलंककलातथातवदशनशिखरे
धरणी।यथाचंद्रेकलंककलानित्यातथात्वयीयमितिज्ञापितं।तस्मिंस्तुकलंककलाप्रकटा।

Pandit Shri Gattulalaji Research Centre
Geeta Govinda
Bhava Prabodhini

दृश्यंते त्वयि तथा न किंतु निमग्नाः प्रकटा हासादिषु दृष्टत्वात्॥ केशवपदेन ब्रह्मादीनां सु
खार्थमनुचितां विलसत्स्वरूपमपि ध्वनितं सुखदत्वं तथा भगवतः सर्ववंद्यस्य स्त्रीपादपतन।
मनुचितमपि व्रजसादिनां वा पत्नीनां सुखोत्पादनार्थं तत्कृतवानित्यर्थः॥५॥ तव दशनशि
खरे दंताग्रे धरणी अधरं नीयते। प्राप्यते यया सा धरणी सा तव तत्र लग्ना वसति रूपमपिन्नि
न्ना भवति। तत्र स्थिता धरणी न निमग्ना नितरां मग्ना एकत्वभावं प्राप्नोतीत्यत्र कलंककला
यामा भवति शिशिनि गौरवर्णे शिशिरूपा मः कलंककला गौरत्वेन विपरीत्याच्चिह्नितत्वेन
हासो हास्यं च बिभत्सो विकृतमित्यत्र त्वादत्र बिभत्सो रसः॥ शिशिनि कलंककलेव। य।
था शिशिनि कलंककला तथा तव मुखचंद्रे कलंककलेवेयमित्याशयः सूचितः॥ यद्वा।
दशनशिखरे तस्याः अधरं पीड्यमाने मुंच मुंचेति कलममव्यक्तमधुरवोक्तिस्तया कस्य सु-
खस्य कला [illegible] षोभूरान्नागानाना लावण्यरूपा तथाविधा सति निमग्ना नितरां मग्ना एवं वि

धाधरसुधापाने विरशाजातेति भाव॥ सूचितः एवंविधाधरणी तवदशनशिखरेलग्नावसती
तपर्थीः॥ एवंविधछत्तश्लककररूपकेशवजयजगदीश एवंविधस्यस्वनिर्मितस्यजगतः ईशाहरेतस्या
ःडुःखहरणतथा॥ अत्रबिभत्सरसोवर्णितः तस्यश्लककरावत्माराधिष्ठातृदेवभूतातः॥ अथैवंविधा
याःखंडितायाः मानत्यागकरणपूर्वकंरमणकरणनिरूपयन्नेवाह। तवकरकमलवरइति। ए
वंतुशठमागसमानवत्याः स्वयंहरिः मानापनोदनंतस्याः प्रणिपातपरःसरं॥१॥ चकारविन
यंसोसौनतत्याज तथापितं। निर्व्यथापाणिनास्पृष्टाजातावासन्मुखीप्रिया॥२॥ तथाभूतां
समालोक्यबाहुभ्यांभगवान्हरिः॥ परिष्वज्यांकमारोप्यहरिणपकत्रिपीतदा॥३॥ तन्नीत
नुस्थितंमानंदृंगरूपंदुरासदं॥ रुष्टांतरायकरणद्वैतरूपंविदारितं॥४॥ करांबुजेनखस्टं
गैर्भाकुचोत्पपार्श्वयोः॥ चकारसन्मुखींतावक्षुंगेनावनताननीं॥५॥ पिधायकर्णौगिरौः
चस्वबाहुभ्यांस्तनौस्थितां॥ करेणचिबुकंधृत्वापरेणकबरंप्रियः॥६॥ विलोक्यमुदितांहंसी

Pandit Shri Gattulalaji Research Centre
Geeta Govinda
Bhava Pradhaini

तांपाणिभ्यांविधृतौकुचौ॥कंचुकींपाटयित्वातौममर्दकनकप्रभौ॥१७॥चुंबयित्वामुखंतस्या
:पीडयामासचाधरं।पीड्यमानेधरेसातुविलोक्यहृदयेनखं॥१८॥अधुनामुंचमुंचेतिबभाषे।
सावरंवचः॥श्रुत्वातद्भगवान्नाहसंतुष्टःप्रहसन्मुखः॥१९॥कृशोदरित्वंयदिचाद्यमानंनमुंच।
सिचेन्ममपत्रपहृत्वं।धृत्वाकपोलौसुचिरैकराभ्यांपचुचुंबवक्त्रंहरिःप्रगाढं॥२०॥प्रचुंबमाने॰
वदनेमृगाक्षीधृत्वास्वदंतैरधरंप्रियस्य।उवाचहासेकरुचाद्यपश्यगमिष्यसित्वंकथमन्यगेहं
॥२१॥इतिब्रुवाणासुमृगाननाङ्गंनिधायकंठेस्वभुजंप्रियाधरं॥संपीडयामासतदामुकुंदमु
कुः संक्षोभितंकंकणमुद्रिकादिभिः॥२२॥संपीड्यमानेत्वधरेहरिस्तदाविमुंचमुंचेत्यवदत्कृशोद
रि॥दासस्त्वदीयोस्मिनकदापिचाहंगृहंगमिष्यामिशपथंत्वदन्यः॥२३॥एवंब्रुवाणेस्वपि
येमृगाक्षीप्रोवाचगाढंपरिरभ्यतिष्ठ॥तृणंत्यजेयंकथमंबुजाक्षप्राप्तोसिपुण्येनमहत्कृतेन॥
२४॥तयोरेवंविहरतोर्जालरंध्रेसखीजनः॥विलोक्यमुदिताःकृष्णंरतांतेतमुवाचह॥२५॥त

गीत० नाव० वकरकमलवरइत्यादि॥ ॥तवकरकमलवरेनखमद्भुतशृंगं।दलितहिरण्यकशिपुतनुभृंगं

२२ ।केशवधृतनरहरिरूपजयजगदीशहरे॥४॥हेकेशवधृतनरहरिरूपजय॥सर्वदैवंविधो

नव॥किंत्वया।नरहरिरूपमपिधृतं।यथानरहरेःकरकमलवरेनखंतथातवकरकम

लवरेनखमस्ति।कीदृशंअद्भुतशृंगमद्भुतमाश्चर्यजनकंशृंगमग्रंयत्रतं॥अद्भुतत्वेवाह॥

दलितहिरण्यकशिपुतनुभृंगं।दलितःहिरण्यकशिपोर्दैत्यस्यतनुरूपोभृंगोयेनतत्अत्र

न्यत्रिकमलायंभृंगेनदल्यतेइदंकमलायंभृंगंव्यदारीदित्यद्भुतशृंगत्वंविषाणोत्कर्षयो।

श्चाग्रेशृंगस्यादितिविश्वः॥तथाचतवकरकमलवरेनखंअद्भुतशृंगं।कीदृशंदलितःहिर

ण्यकशिपोसुवर्णशय्यायांदैत्यरूपस्तन्वीतनुस्थितोमानरूपोभृंगोयेनततयथाहिरण्य

कशिपुर्जैत्रमशक्तस्तथायंमानोपित्वयाजितुमशक्यः॥भगवत्यापंतरथ्यकरणायकरणा २२

त्मानस्यदैत्यरूपत्वं।कमलमुखीपद्मस्थितत्वात्मानस्यभृंगत्वंचायका।दलितस्याजितः॥

हिरण्यकशिपोर्हिरण्यशय्यायां॥ तनु विस्तारे। अतिशयविस्तारं तं प्राप्तो बाह्यान्तरतः॥ बाह्ये सन्मुखावलोकननिषेधादिकरणात्॥ अन्तरे अनुनयविनयपादपतनादिना त्याज्यातिगाढीभूतस्याजितोभिमानभङ्गो येन तत्। मनःमालिन्यकरणान्मानस्य भंगरूपत्वं। एवंविधो नखशृंगेण मर्मस्पर्शेण व्याकुलीकृतं पलोके युदयुदीकृतपला जित इत्यर्थः॥ स तनुभृंगस्तु बहि खिन्नो दलितश्चायं मानभंगस्यांतः खिन्नो दलित इत्यद्भुतत्वं। किंच। अन्यस्य हृतकरणा क्रोधो वैरं च जायते॥ अत्र नखद्वृते जाते वैरो जायतेत्यद्भुतत्वं च॥ यद्वा॥ धृतनरहरिरूप धृतं नराणां भक्तानां प्रह्लादादीनां दुःखहरणात् हरिस्तादृशं रूपं धृतवा॥ तद्दुःखदातुर्हिरण्यकशिपुतनुभृंगस्य दलनं कृतं तथात्रापि एतस्य भगवदंतरायकत्वात्। दुःखदातृत्वं। पूर्वोशय्यायां मानभृंगस्य दलनं कृतं तद्दुःखहरणार्थं नरेभ्यो हरिः सिंहः श्रेष्ठः तथारूपं धृतं येन॥ केशव जगदीश संबोधनार्थस्तु पूर्वोक्तवत् ज्ञातव्यः॥ नखमद्भुतशृंगमित्यद्भुतपदोक्तत्वा

त्वान्नृसिंहावतारस्याद्भुतरसस्याधिष्ठातृदेवतात्वात्।अत्राप्यद्भुतरसस्यनिरूपणं।एकदा
प्रियसखासहसुप्तासतिप्रियाभगवदागमनादिवार्त्तांकुर्वंत्यौसंत्यौतदाकस्मात्भगवाना
गत्यतत्कृतवार्त्तांश्रोतुकामोहरिर्वामनोभूत्वाशनैःशनैर्यथातेस्वागमनंनजानीयात्तथैवंभूत्वा
शय्यांसमीपेगतस्तदातत्रस्थितंजलपानपात्रंकंधरादिकंहरिचरणलग्नमपतत्तेनतदवलोक
नार्थमुत्थितासतीतथाभूतंप्रियंदृष्ट्वोक्तवतीतत्राह।।छलयसीति।। ।।छलयसिविक्र
मणेबलिमद्भुतवामनपदनखनीरजनितजनपावन।केशवधृतवामनरूपजयजगदीश
हरे।।५।।हेकेशवअद्भुतवामनरूपजय।किंवामनरूपंधृत्वासमागमोसि।यथावामनेन
विक्रमणेत्रिपादकरणेबलिछलनंकृतंतथात्वमपिधृतवामनरूपवामनरूपंधृत्वाविक्र
मणेपादविक्षेपेऽबलांछलयसीत्यद्भुतत्वं।अहंबलिर्नभवामिअबलाबलरहितामबलांछल
यसि।यद्वाबलिनात्मसमर्पणंकृतंतथात्रसमर्पणंकृतंत्वाछलितंज्ञाता।किंछलयसीतिभावः।

कीदृशः पदनखनीरजनितजनपावन।पदनखनीरेणजनितःजनपावनोयेनस।तथा।त्रैतत्पदसंबंधाज्जलपात्रपतनात्तथापदनखनीरेणजनितमस्मद्विधजनं।दीयमानंनगृह्णंति।विनामत्सेवकंजना।। एवंविधानांजनितंजनानांपावनंयेन।तथाविधात्वत्राप्यद्भुतवामनपदोत्थत्वादद्भुतरसनिरूपणं।वामनावतारस्यापिअद्भुतरसस्याधिष्ठातृदेवतात्वाच्च।अतः।परंनवोढारतिकेलिंनिरूपयन्नेवाह।।क्षत्रियरुधिरमयइति।। ।।क्षत्रियरुधिरमयेजगदपगतपापं।स्नपयसिपयसिशमितभवतापं।केशवधृतभृगुपतिरूपजयजगदीशहरे।।ध्रु।।कदाचिन्निकुंजेसखिभिःसहनववधूगतांसमाज्ञायतस्यांसततमनुरक्तमनाहरिः।।सख्याज्ञापितसंकेतस्थलमगमत्तदातत्रगत्वातयासहारारमत्तदाकुंजबहिःस्थिताःसख्योनवोढारतिरणजयानंतरंनखक्षतांकंपरस्परंदृष्ट्वावदन्तितत्राह।हेकेशवधृतभृगुपतिरूपजय।त्वयाद्यकिंभृगुपतिंपरशुरामस्वरूपंधृतं।यथाभृगुपतिः।

क्षत्रियरुधिरमयेपयसिजगत्स्नपयतितथात्वमपिस्फुरतसंग्रामेसन्मुखंस्थितत्वात्क्षतंधार
यतीतिक्षत्रियरूपायानवोढायाःनखक्षतजनितप्रचुररुधिरमिश्रितश्रमस्वेदरूपेपयसि
।जगत्गमनशीलत्वंजगत्स्नपयसि।यद्वा।यथायथाप्रियापांगशरपातस्तथातथातदाभिमु
ख्यंभजसेभजसेनक्षत्रियोसिकिंभुतस्तुकेश्वतस्याःक्षतनखक्षतजनितरुधिरमयेपयसिपूर्वो
क्तगमनशीलरूपंजगत्स्नपयसीतिभावः।श्रमजलसिक्तकलेवरयेतिवक्ष्यमाणत्वात्।की
दृशंजगत्।अपगतपापं।अपगतंपापंयस्यतत्।अत्रापगतंपापरूपंभयंयस्यतत्।पापंतु
भगवत्साद्यं।तदंतरायकारकं।नराणांक्षीणपापानांकृष्णेभक्तिःप्रजायतइति।तथानवोढाप्र
थमसमागमभयात्प्रियंनगच्छेत्तदंतरायकारकत्वात्तदधुनानवोढायाःप्रियसंगमेपाप
रूपभयापगमनात्तथोक्तिरितिभावःसूचितः।पुनःकीदृशं।शमितभवतापं।शमितःभवसं।
सारतापोयस्यतत्।।अत्रापिशमितः।भवस्यजन्मनस्तापोयस्यतत्।जन्मदिवसादारभ्यैताव-

त्यर्थंतत्ताप एव स्थितः।कदा भगवत्प्राप्तिर्भविष्यति जन्मसाफल्यं कदा भविष्यतीत्येवंविधोय
स्तापः स्थितस्तदधुनापगतः।यद्वा।शमितः भवेन प्राकट्येन तापो यस्य तत्।।गोप्यश्चाकर्ण्य
मुदिता यसोदायासुतोभवमिति।।यद्वा।शमितः भवोत्पन्नविरहस्य तापो यस्य तत्।भगव
त्प्राप्तिपर्यन्तं विरहतापः स्थितः सः शमितः।यद्वा।शमितभवसंसारः संशरणं।अभिशरणं
गमनागमनाभिसारे समागमो भविष्यति।न वेति।मार्गे दृष्टः कोपि प्रपश्यति।एवंविधो यस्तापः
:स समागमनाम्नाशित इत्यर्थः।केशवेति।संबोधनं पूर्ववत्।जगदीशेति गमनशीलस्य जग
तः।नवोढारूपस्येशः।अत्र रौद्ररसो निरूपितः।रौद्रस्तुग्र इत्यमरः।परशुरामावतारस्य रौ
द्ररसस्याधिष्ठातृदेवतात्वाच्च एवं नवोढारतिक्रीडायां नखक्षतांकितं भगवंतमागतं दृष्ट्वा
खंडिता वाक्यमाह।। ।।वितरसीति।। ।।वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौ
लिबलिं रमणीयं।केशव धृतरघुपतिरूप जगदीश हरे।।५।।हे धृतरघुपतिरूप जय।य

थारघुपतेरेकपत्नीव्रतंअन्यांनगच्छति।तथात्वमपितांत्यक्त्वान्यांनगच्छति।कथमत्रागतो॰
सि।अन्यच्च।रघुपतेःपत्नीरावणेनहृता।तत्रगत्वादशमुखेनसहरणेहत्वातांकितोजातस्तदा
जगदुद्वेगकारकंदशमुखंहत्वादशदिक्पतीनांइंद्रादीनांदशसुदिक्षुदशमुखमौलिरूपं
बलिंविलसितांकीदृशंकमनीयमाकांक्षितं।वांछितं।कमुत्राकांक्षायां।रमणीयंच।रक्षाय
याष्टिकंडुकक्रीडाकरणयोग्यं।तथात्वमपितथाकलारमदधिष्ठितातिरिक्तासुदिक्षुतदि
क्पतीनांतासुस्थितासुसुंदरीणांकमनीयमभिलिषितंरमणीयंरमणक्रीडासमययो
ग्यंसन्मानार्थंपादपतनेननखाग्रेषुप्रतिबिंबितंदशमुखमौलिरूपमपराधक्षमाप
कंबलिंउपहारंवितरसि।यद्वा।रामावतारप्राप्तवराणांदंडकारण्यवासिनामृषिकुमार॰
रूपाणांकामिनीव्रजांगनाजातानांजातिस्मरणांवचनं।हेकेशवसर्वैःक्लिन्नावयुक्तानांसुखद
धृतरघुपतिरूपत्वंधृतंरघुपतिरूपंयेनसतथा।तदादंडकारण्येस्माभिःप्रार्थितःसन्व

रंहत्वात्वरयादशमुखंरावणंहत्वातद्दशमुखमौलिबलिंदिक्षुपूर्वोक्तानांइंद्रादीनांतत्तद्दि
क्पतीनांपूर्वोक्तैःकमनीयंबलिंवितरणंकृतवानसि।ततोस्मदर्थमेवप्रादुर्भूतोभवान्महता
क्लेशेनव्रतादिचरणात्प्राप्तोतोस्मान्विहायास्मद्व्यतिरिक्तासुक्रीडसीत्यपिभावःसूचितः।के
शवादिसंबोधनार्थंपूर्ववत्।रामावतारेवीररसस्याधिष्ठातृदेवतात्वादत्रवीररसःप्रोक्तः
।उत्साहवर्द्धनोवीरः।एकदाभगवान्सर्वांगचंदनचर्चितः।।वर्द्धमाणचंदनाचर्चितनीलक
लेवरोकेशश्चएवंविधस्सन्रात्रावन्यत्ररमणंकृत्वाजागरजनितघूर्णायमाननयनप्रियानी
लवसनव्यत्यासोत्तरीयस्खलत्पश्चामुखसिसमागतंभगवंतंदृष्ट्वाखंडितावाक्यमाह।।वह
सीति।।।वहसिवपुषिविशदेवसनंजलदाभं।हलहतिभीतिमिलितयमुनाभं।।केशवधृ
तहलधररूपजयजगदीशहरे।।८।।हेकेशवधृतहलधररूपजय।हलधररूपंधृत्वाभयो
त्पादनार्थंकिंसमागतोसि।यतस्त्वंविशदेउज्वलेवपुषिजलदाभंप्रियानीलवसनंवहसि·

Geeta Govinda
Bala Prabodhini

कीदृशं।हलहतिभीतिमिलितयमुनाभं।।हलहननभीत्यामिलितायायमुनातयाआभायस्मिन्
स्तत्।यथाकालिन्दीयमुना हलहननभीत्यागत्यमिलितातथा।एवंदिशागमनेनमांतथाज्ञापयसी
त्याशयः।अन्यत्र हलाभाविकर्षं हलधरत्वं।हलधरणंबलरामस्यहलधरनामननुसर्वदाह।
लंधृत्वैवतिष्ठति।यथादामोदरः।गिरिधरः।भगवान्सर्वदातथाविधस्तिष्ठति तथाहलधरःप्रोक्त
इति भावः।।हलधरावतारे भयानकरसस्याधिष्ठातृदेवतात्वाद्भयानकरसःप्रोक्तः।।एकदा
भगवान्रासलीलार्थं वेणुनादंकृतवांस्तदातच्छ्रुत्वादोहनादिकार्यंशिशुवत्सादीनांस्तनपानादि
कंत्याजयित्वाव्रजसुंदर्यःसमागमन्ताःसमागताःवीक्ष्यप्रतियाततततोयदानक्रंदंतिवत्साबा
लाश्चतान्पाययेत्यादिवाक्यैरागमनंनिंदितवान्।तदाकर्ण्यताऊचुरित्याह।।निंदसीति।।निं
दसियज्ञविधेरहहश्रुतिजातं।सदयहृदयदर्शितपशुघातं।केशवधृतबुद्धशरीरजयजग
दीशहरे।।ए।हेकेशवधृतबुद्धशरीरजय।।धर्मबोधकत्वात् बुद्धस्तत्रउक्तंपत्पयात्रेवि

Geeta Govinda Bhava Prabodhini

त्वं।अहहखेदे।यथाबुद्धःयज्ञविधेःश्रुतिजातंयज्ञविधायवेदवाक्यंनिंदति।स्वयंवेदान्अकरूपस्वयमेवनिंदतीतिखेदः।कीदृशंदर्शितपशुघातं।दर्शितःपशुघातोयत्र॥यतःसदयहृदंदयीयस्यहेतादृशतथात्वमपियज्ञविधेःयजतीतियज्ञःयजदेवपूजासंगतिकरणदानेषु॥अत्रयज्ञविधिःसंगतिकरणविधिस्तस्यश्रुतिजातं।वेणुश्रवणजातंपार्श्वागमनं।तन्निंदसिप्रतियातततोगृहानित्यादिवाक्यैःक्रंदंति।वत्साबालाश्चेत्यादिभिःपशुघातंदर्शितंतेषुस्तन्यैकजीविनांतेषांस्तनपानंविनाक्षुधयाक्रंदनेनमरणमेवसंभावितंतदितिरिक्तंजीवनंदेहासंभवात्॥स्वयंवरंदत्वामयेमारक्षथद्विपति।विष्णुनादेनाकारयित्वास्वयमेववदतिप्रतियातततोगृहान्सहृदयेतिखेदोत्रएवंविधः।अतोहेसदयहृदयसकरुणहृदयअत्रैवंकिमर्थंवदसि।त्वंतुकेशव।ब्रह्मादीनांसुखदः।तत्रतमोगुणाधिष्ठातुः।सर्वसंहारकारकस्यरुद्रस्यापिसुखंप्रयच्छसितत्रदयांनकरोषि।यतोजगदीशस्त्वंजगत्प्रतिपालकश्चतदातदारयाकथंसंहारयसि

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

तत्रदयांनकरोषि जगत्पालकस्त्वंवयमपिजगदंतःपातिनः अस्माकमपिदयाकर्त्तव्या। पालनंकर्त्तव्यंयतोवयंत्वत्कारत्वयिधृतासवः। असवस्त्वय्येवतिष्ठति। असंस्त्वत्कायमनेस्माकमपिमरणंस्थित्यर्थेव। परोक्षास्थितेषुदयांकरोषिसमीपस्थानमारयसि। सम्यक्सदयहृदयत्वंदरिःसर्वदुःखहर्त्तातेषुरक्षणीयावयमपिपालनीयाइतिभावःसूचितः। अत्रकरुणारसोनिरूपितः। बुद्धावतारस्यकरुणारसस्याधिष्ठातृदेवतात्वात्।। एकदाभगवान्सखीभिःसहागत्यमानवतींराधामवनतमुखीमवलोक्यबह्वीभिरनुनयैःकलामानंत्याजितवान्सानत्यकवतीतदैवाभिन्करेकबरधृत्वापरेणचिबुकंधृत्वावनताननमुन्नतंकृत्वाचुंबमानंहर्षितवान्।। तद्वीक्ष्यसखीजनःप्रोवाचेत्यत्राह।। ।।म्लेच्छनिवहनिधनेइति।। ।।म्लेच्छनिवहनिधनेकलयसिकरवालं।। धूमकेतुमिवकिमपिकरालं।। केशवधृतकल्किशरीरजयजगदीशहरे।।१०।। हेकेशवधृतकल्किशरीरजय यथाकल्कीम्लेच्छनिवहनिधनेम्लेच्छानांविव